# श्री सम्पत्कुमारस्तवः

## प्रो॥ व ति तिरुनारायणैयङ्गार्यप्रणीतः

सर्वेशानं स्वतन्त्र निरतिशयबृहत्वाश्रयं शास्त्रवेद्यम्
विश्वोत्पादप्रतिष्ठाविलयनियमनाद्येकहेतुत्वलक्ष्यम् ।
आत्मानं हेयभूतप्रकृतिविसदृशं मोक्षदं जीवभिन्नम्
ज्ञानानन्दात्मभावं यदुगिरिनिलयं श्रीसखं नौमि नित्यम् ॥१॥

श्रीमन्तं वरदं भयापहरणं लक्ष्यं शठारेर्गिरां
आनन्दादिगुणाकरं निरुपमं हेयप्रतीपं प्रभुम् ।
आत्मानं जगतो जनिस्थितिलयस्थानं यदुक्ष्माभृति
स्वेच्छादृश्यमशेषसेव्यचरणं नारायणं संश्रये ॥२॥

अनन्याधीनस्त्वं गुणनिधिरवद्यप्रतिभटः
श्रियः श्रीः सूरीणां परिषदभिषेव्यः खनिलयः ।
जगत्कार्यं लीलास्थिरचरमशेषं तव तनुः
शरण्य त्वत्पादौ शिरसि मम नित्यं विलसताम् ॥३॥

परिपालनयज्ञदीक्षितस्त्वं
गुणसक्तानिव सापराधजन्तून् ।
परिपालितवान् यथाप्रतिज्ञं
किमहं वा त्वदुपेक्षितो विदध्याम् ॥४॥

यदि नाथ न वीक्षितुं स्पृहा ते
क्षिप मां क्षिप्रमलक्ष्यभूमिषु त्वम् ।
अथ ते न किमप्यगोचरं चेत्
प्रसभं मां नय ते पदाब्जयुग्मम् ॥५॥

श्रीमद्यदुशिलोच्चयशिखरसंश्रयश्वसनसखशिखासमुज्ज्वलप्रभामलकमलालयाञ्चित-फणिपतिफणामणिगणघृणिकदम्बकञ्चुकितसुवर्णमयदिव्यमङ्गलदीपम् सुररिपुसन्ततिप्रसूतासुहृदभिष्टुताविरतदुश्चरितरतभूतेशभूतसमुद्भूतमहाभयनिवारण-निपुणतपनकिरणसहस्रातितीक्ष्णतेजसम् नाभीपङ्कजविष्टरोपविष्टचतुर्मुखमुखोत्सृष्ट-नित्यनिर्मलनिस्तुलसस्वरसरस्वतीसमूहमूर्धाभिषिक्तश्रीपुरुषसूक्तोक्तश्रीपतिविश्वसृडनु-पमरूपविलोकनविस्मितवेधःकरधृतहेमकमण्डलुनिस्सृतनिर्झरशम्बरसीकरसिक्त-जगत्पतिपादसमुद्भवजगतीपावनजाह्नवीप्रकटितश्रीपादपुष्करोत्कर्षम् ब्रह्मात्मजात-निष्टागरिष्टवरिष्टवसिष्टस्वाधिष्टितकुटीकुञ्जकन्दरार्पितत्रयीकल्पसिद्धसपर्योपचारसन्तुष्टम् प्रसादप्रकर्षोपलब्ध “कुलधललाभ” धन्यसकलसुरासुरमान्यरक्षोऽधिनाथस्वशीर्षापनीत-श्रीरङ्गनाथविरहसमुत्थव्यथार्दितचित्तरघुनाथहृदयसारसनिवासप्राप्तिप्राप्तप्रीत्युपात्त “श्रीरामप्रिय”-नामधेयम् यात्रागतिक्रमनिषेवित “नारायणगिरि” गोचरसकलचराचरेश्वररम्यरूपसरूप-स्वकुलाभ्यर्चितमूर्तिस्मृतिसन्ततिवर्धितप्रमोदसोत्साहसङ्कर्षणमतस्थितवसुदेवात्मजनिजशय-कुशेशयकल्पित “यदुशैलालयमध्यमण्डप” रचितरत्नसिम्हासनकृतस्थिरस्थितिम् कालिन्दीकूलविरचिताक्रीडविचरितविविधक्रीडाकृष्टचित्तयदृच्छानुवर्तितकंसध्वंसिपदप्रियव्राष्णेव-धूटीवर्तनदस्युनृपकुलकल्प[1]लताकल्पनृपदुहितृहृदयकमलसदननिहितमृदुलपादपङ्कजम्

मृदुमञ्जुलपन्नगेश्वरशयनशयनीयसलक्षणलक्ष्मणयोगीश्वरदिव्याङ्कपर्यङ्कसमारोहणसम्प्रवर्तित-निजाद्भुतनिरवधिकमहाभोगियोगभोगप्रसृतिम् अतिभास्वरदिव्यकिरीटनूपुरपीताम्बरोदरदाम-कटकाङ्गदश्रीवत्सकौस्तुभवैजयन्तीमकरकुण्डलयज्ञसूत्राङ्गुलीयकमुखबहुमुखमण्डनमण्डितम् भूषणीकृतशङ्खचक्रादिभीषणायुधचयम् कस्तूरीविरचितदिव्योर्ध्वपुण्ड्रतिलकलसल्ललाटदेशम् विशालविमलकमलनयनम् मन्दस्मितरुचिरवदनम् भयहराभयमुद्रामुद्रितदक्षिणहस्तम् शरणागतसहायश्रीजुष्टपदयुगलम् परात्परं परवन्तं अद्वितीयं श्रीसहायं दुरासदं पुरःस्थितं श्री “यदुगिरिरमा” वदनविलासविधेयविहारं यतिराजसम्पत्कुमारं श्रीमत्सौम्यवराभिधमहामुनि-पूर्वरूपभूत “भविष्यदाचार्यवर” रूपसन्दर्शननिमित्त “कारिसूनु” कारुण्यपात्रभूतश्रीनाथकृतसत्कार-पात्रभूत “श्रीमद्द्राविडवेददेशिक” विमलकुलोदयसकलकलानिधिभूत “श्रीकृष्णपादपादाब्जलोलुप”-

---

[1] दस्युनृप-कुल-कल्प — शालिवाहनशकसमयः (1018 - 31 =987)

तत्तनुजात्मजदेवाधिपप्रसादाधिगतपाराङ्कुशश्रुतिभाष्यप्रवर्तकतत्तनय-
“श्रीरङ्गराजदिव्याज्ञालब्धसाम्राज्यलाञ्चन” तत्सूनुसिम्हश्रीमदहोबिलनारसिम्हाभिमत-
“श्रीमदादिवण्शटकोमुनीश्वर” तत्कुलधूर्वहनिजात्मनिदर्शितयामुनेयचरमदशामहिम-
“श्रीनारायणसूरिवर्य” प्रमुखपरमभागवतस्तोमपरिचरितचरणयुगलं सर्वशेषिणमं अस्मत्स्वामिनं सहजकरुणावीक्षापास्ततिमिरच्छदम् भक्तिकणसेकवर्धितदर्शनवैशद्यम् निरन्तरं निर्निमेषं नित्यकिङ्करः प्रेक्षिषीय॥

श्रीवेङ्कटयतीशार्यमाचार्यं पितरं भजे ।

श्रीनारायणतनयं द्राविडाम्नायदेशिकम् ॥

---